श्री शास्तास्तुतिदशकं

आशानुरूपफलदं चरणारविंद-
भाजामपारकरुणार्णवपूर्णचंद्रं ।
नाशाय सर्वविपदामपि नौमि नित्य-
मीशानकेशवभवं भुवनैकनाथं ॥1॥

पिंछावली वलयिताकलितप्रसून-
संजातकांतिभरभासुरकेशभारं ।
शिंजानमंजुमणिभूषणरंजितांगं
चंद्रावतंसहरिनंदनमाश्रयामि ॥2॥

आलोलनीललललिताळकहाररम्य-
माकम्रनासमरुणाधरमायताक्षं ।
आलंबनं त्रिजगतां प्रमथाधिनाथ-
मानम्रलोकहरिनंदनमाश्रयामि ॥3॥

कर्णावलंबिमणिकुंडलभासमान-
गंडस्थलं समुदिताननपुंडरीकं ।
अर्णोजनाभहरयोरिव मूर्तिमंतं
पुण्यातिरेकमिव भूतपतिं नमामि ॥4॥

उद्दंडचारुभुजदंडयुगाग्रसंस्थं
कोदंडबाणमहितांतमदांतवीर्यं ।
उद्यत्प्रभापटलदीप्रमदभ्रसारं
नित्यं प्रभापतिमहं प्रणतो भवामि ॥5॥

मालेयपंकसमलंकृतभासमान-
दोरंतराळतरळामलहारजालं ।
नीलातिनिर्मलदुकूलधरं मुकुंद-
कालांतकप्रतिनिधिं प्रणतोऽस्मि नित्यं ॥6॥

यत्पादपंकजयुगं मुनयोऽप्यजस्रं
भक्त्या भजंति भवरोगनिवारणाय ।
पुत्रं पुरांतकमुरांतकयोरुदारं
नित्यं नमाम्यहममित्रकुलांतकं तं ॥7॥

कांतं कळायकुसुमद्युतिलोभनीय-
कांतिप्रवाहविलसत्कमनीयरूपं ।
कांतातनूजसहितं निखिलामयौघ-
शांतिप्रदं प्रमथयूथपतिं नमामि ॥8॥

भूतेश भूरिकरुणामृतपूरपूर्ण-
वारान्निधे, वरद, भक्तजनैकबंधो । (वारान्निधे परमभक्त)
पायाद्भवान् प्रणतमेनमपारघोर-